# Shri Ganeshavajrapanjara Stotram Shrishivakritam

# શ્રીશિવકૃતં શ્રીગણેશવજ્રપઞ્જરસ્તોત્રમ્

## Document Information

Text title : Shri Ganeshavajrapanjara Stotram Shrishivakritam

File name : gaNeshavajrapanjarastotramshrIshivakRRitaM.itx

Category : ganesha, mudgalapurANa, panjara, stotra, dvAdasha

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM aShTamaH khaNDaH | adhyAyaH 23 | 8.23 19-34||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# શ્રીશિવકૃતં શ્રીગણેશવજ્રપઞ્જરસ્તોત્રમ્

॥ શ્રીગણેશાય નમઃ ॥
શ્રીશિવ ઉવાચ ।
ગણેશાય નમસ્તુભ્યં વિઘ્નરાજાય ઢુણ્ઢયે ।
પરેશાય ચ હેરમ્બાય પાશિને નમો નમઃ ॥ ૧૯॥
મૂષકવાહનાયૈવ નમઃ પરશુપાણયે ।
દન્તાભયધરાયૈવ ત્રિનેત્રાય નમો નમઃ ॥ ૨૦॥
શૂર્પકર્ણાય વીરાય ચન્દ્રરેખાધરાય તે ।
સિન્દૂરભૂષણાયૈવ રક્તરઙ્ગાય તે નમઃ ॥ ૨૧॥
હેરમ્બાય મહાવિઘ્નવારણાય ગજાનન ।
આદિપૂજ્યાય સર્વેષાં પૂજ્યાય તે નમો નમઃ ॥ ૨૨॥
સ્વાનન્દવાસિને તુભ્યં સ્વાનન્દમયમૂર્તયે ।
સર્વાકારાય સર્વેષાં માત્રે પિત્રે નમો નમઃ ॥ ૨૩॥
અનન્તોદરભાવાય બ્રહ્મણાં પતયે નમઃ ।
બ્રહ્મભૂતાય દેવાય દૈત્યદાનવમર્દિને ॥ ૨૪॥
અનન્તવિભવાયૈવ ભક્તપાલનધર્મિણે ।
અભક્તાનાં વિનાશાય ખેલકાય નમો નમઃ ॥ ૨૫॥
યોગાય યોગનાથાય યોગિને યોગદાયિને ।
સદા શાન્તિસ્વરૂપાય શાન્તિશાતાય તે નમઃ ॥ ૨૬॥
કિં સ્તૌમિ ત્વાં ગણેશાન બ્રહ્મણસ્પતિરૂપિણમ્ ।
યોગિનો વેદવેદાન્તાઃ શાન્તિં યત્ર ભજન્તિ ચ ॥ ૨૭॥
ધન્યોઽહં દેવપૈર્દેવૈર્મુનિભિર્ગણનાયક ।
દર્શનાત્તેઽદ્ય પાદસ્ય પરાત્પરતરસ્ય ચ ॥ ૨૮॥
સામર્થ્યં દેહિ વિઘ્નેશ જ્ઞાનરૂપં ત્વયિ સ્થિતમ્ ।
આજ્ઞાનાન્ધકનાશાર્થં ભક્તિં તેઽવ્યભિચારિણીમ્ ॥ ૨૯॥
એવમુક્ત્વા નનર્તાઽસૌ મહાદેવઃ સુરર્ષિભિઃ ।

તં જગાદ ગણાધીશો ભક્તં ભક્તજનપ્રિયઃ ॥ ૩૦॥

(ફલશ્રુતિઃ)

શ્રીગણેશ ઉવાચ ।

વજ્રપઞ્જરકં મે ત્વં ગૃહ્ય દૈત્યેન્દ્રસત્તમમ્ ।

જહિ જ્ઞાનમયં શમ્ભો વિજયી સર્વદા ભવ ॥ ૩૧॥

ભક્તિં મદીયપાદે ત્વં લભસેઽનન્યવૃત્તિજામ્ ।

યદ્યદિચ્છસિ તત્તત્તે સફલં તુ ભવિષ્યતિ ॥ ૩૨॥

ત્વયા કૃતમિદં સ્તોત્રં મદીયં યઃ પઠેન્નરઃ ।

શ‍ૃણુયાત્ સ લભેત્ સર્વં વાઞ્છિતં સર્વદા શિવ ॥ ૩૩॥

ભુક્તિં મુક્તિં પુત્રપૌત્રધનધાન્યાદિકં લભેત્ ।

ભક્તિં મે બ્રહ્મભૂતત્વં શ્રવણાન્નાત્ર સંશયઃ ॥ ૩૪॥

ઇતિ શ્રીશિવકૃતં શ્રીગણેશવજ્રપઞ્જરસ્તોત્રં સમ્પૂર્ણમ્ ॥

દ્વાદશસ્તોત્રં

- ॥ મુદ્ગલપુરાણં અષ્ટમઃ ખણ્ડઃ । અધ્યાયઃ ૨૩ । ૮.૨૩ ૧૯-૩૪॥

- .. mudgalapurANaM aShTamaH khaNDaH . adhyAyaH 23 . 8.23 19-34..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganeshavajrapanjara Stotram Shrishivakritam*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*